"पलायनानुत्तरत्वादन्यपक्षाश्रयेण च ।
हीनस्य गृह्यते वादो न स्ववाक्यजितस्य च ॥"
मनुः ।
"बलाद्दत्तं बलाद्भुक्तं बलाद्या लिखितश्च यत् ।
सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीत् ॥"
याज्ञवल्क्यः ।
"बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्त्तयेत् ।
स्त्रीनक्तमन्तरागारबहिर्ग्रामकृतांस्तथा ॥
मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः ।
असम्बन्धकृतश्चैव व्यवहारो न सिध्यति ॥"
उपाधिश्छलमिति शूलपाणिः । उपाधिर्भयादिरिति विज्ञानेश्वरः । तन्मते भीतादियोजित इत्युक्तवचनेन पौनरुक्त्यम् । बहिर्ग्रामः बहिर्देशः । मत्तो मद्यादिना । उन्मत्तो वातादिना । व्यसनी द्यूताद्यासक्तः । असम्बन्धो वादिनियुक्तव्यतिरिक्त उदासीनः । आदिपदादस्वतन्त्रदासपुत्त्रादेर्ग्रहणम् । तथा च नारदः ।
"स्वतन्त्रोऽपि हि यत् कार्य्यं कुर्य्यादप्रकृतिं गतः ।
तदप्यकृतमेवाहुरस्वातन्त्र्यस्य हेतुतः ॥
कामक्रोधाभिभूता वा भयव्यसनपीड़िताः ।
रागद्वेषपरीताश्च ज्ञेयास्त्वप्रकृतिं गताः ॥
तथा दासकृतं कार्य्यमकृतं परिचक्षते ।
अन्यत्र स्वामिसन्देशान्न दासः प्रभुरात्मनः ॥
पुत्त्रेण च कृतं कार्य्यं यत् स्यादच्छन्दतः पितुः ।
तदप्यकृतमेवाहुर्दासपुत्त्रौ च तौ समौ ॥"
एतच्च कुटुम्बभरणातिरिक्तविषयम् ।
"कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं समाचरेत् ।
स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् ॥"
इति मनुवचनात् कुटुम्बमवश्यभरणीयम् । अध्यधीनः परतन्त्रः पुत्त्रदासादिः । व्यवहारमृणादिकं ज्यायान् स्वतन्त्रः न विचालयेत् अनुमन्येत । तथा च नारदः ।
"स्वातन्त्र्यन्तु स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतम् ।
अस्वतन्त्राः प्रजाः सर्व्वाः स्वतन्त्रः पृथिवीपतिः ॥
अस्वतन्त्रः स्मृतः शिष्य आचार्य्ये स्वतन्त्रता ।
अस्वतन्त्राः स्त्रियः सर्व्वाः पुत्त्रा दासाः परिग्रहाः ॥
स्वतन्त्रस्तत्र तु गृही यस्य तत् स्यात् क्रमागतम् ।
गर्भस्थैः सदृशो ज्ञेयः अष्टमाद्वत्सरात् शिशुः ॥
बाल आषोड़शाद्वर्षात् पौगण्डोऽपि निगद्यते ।
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते ॥
जीवतोर्न स्वतन्त्रः स्याज्जरयापि समन्वितः ।
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात् ।
अभावे बीजिनो माता तदभावे च पूर्व्वजः ॥"
परिग्रहा अनुजीविप्रभृतयः । तथा च बृहस्पतिः ।
"पितृव्यभ्रातृपुत्त्रस्त्रीदासशिष्यानुजीविभिः ।
यद्‌गृहीतं कुटुम्बार्थे तद्‌गृही दातुमर्हति ॥"
कात्यायनः ।
"कुटुम्बार्थमशक्तेन गृहीतं व्याधितेन वा ।
उपप्लवनिमित्तञ्च विद्यादापत्कृतन्तु तत् ॥
कन्यावैवाहिकञ्चैव प्रेतकार्य्ये च यत् कृतम् ।
एतत् सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ॥"
प्रभोरिति कर्त्तरि षष्ठी तेन प्रभुणा दातव्यमिति रत्नाकरः ॥ बृहस्पतिः ।
"यः स्वामिना नियुक्तोऽपि धनाय व्ययपालने ।
कुसीदकृषिवाणिज्ये निसृष्टार्थस्तु स स्मृतः ॥
प्रमाणं तत् कृतं सर्व्वं लाभालाभव्ययोदयम् ।
स्वदेशे वा विदेशे वा स्वामी तन्न विसंवदेत् ।"
इति श्रीरघुनन्दनभट्टाचार्य्यविरचितं व्यवहारतत्त्वं समाप्तम् ॥ * ॥

**व्यवहारज्ञः**, पुं, ( व्यवहारं जानातीति । ज्ञा + कः ।) प्राप्तव्यवहारः । (साबालक इति भाषा ।) स तु षोड़शवर्षानन्तरं भवति । यथा,—
"बाल आषोड़शाद्वर्षात् पौगण्डोऽपि निगद्यते ।
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते ॥"
इति व्यवहारतत्त्वधृतनारदवचनम् ॥
व्यवहारज्ञातरि, त्रि ॥

**व्यवहारदर्शनं**, क्ली, (व्यवहारस्य दर्शनम् ।) न्यायदर्शनम् । विचारकरणम् । इति मिताक्षरा ॥

**व्यवहारपदं**, क्ली, ( व्यवहारस्य पदम् । ) वादिना राज्ञि निवेदनम् । ( नालिस इति भाषा ॥ ) यथा, याज्ञवल्क्यः ।
"स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥"
स्मृतिसदाचारबहिर्भूतेन वर्त्मना परैर्यतः शरीरतो वा पीड़ितश्चेद्राजनि निवेदयेत् तद्‌व्यवहारदर्शनस्थानम् । चेदित्यत्र यदिति मैथिलाः । आवेदयति चेदित्यनेन स्वयं विवादोत्थानं राज्ञा न कर्त्तव्यमिति शूलपाणिमहामहोपाध्यायाः ॥ राज्ञीति व्यवहारप्रदर्शकपरं तथा च बृहस्पतिः ।
"राजा कार्य्याणि संपश्येत् प्राड्विवाकोऽथ वा द्विजः ।"
कात्यायनः ।
"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः ।
स्वयं स राजा विनुयात् तेषां जयपराजयौ ॥
यदा कार्य्यवशाद्राजा न पश्येत् कार्य्यनिर्णयम् ।
तदा नियुञ्ज्यात् विद्वांसं ब्राह्मणं वेदपारगम् ॥
यदि विप्रो न विद्वान् स्यात् क्षत्त्रियं तत्र योजयेत् ।
वैश्यं वा धर्म्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ॥"
स विनीतवेशः । मनुः ।
"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥"
व्यासः ।
"द्विजान् विहाय यः पश्येत् कार्य्याणि वृषलैः सह ।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोषञ्च नश्यति ॥
दुःशीलोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः ।
दुग्धां गां कः परित्यज्यार्थयेच्छीलवतीं खरीम् ।"
इति व्यवहारतत्त्वम् ॥

**व्यवहारपादः**, पुं, ( व्यवहारस्य पादः । ) व्यवहारांशः । यथा । अथ व्यवहारपादनिर्णयः । तत्र बृहस्पतिः ।
"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः ॥"
इति व्यवहारतत्त्वम् ॥
अपि च ।
"परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु ।
वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदाहृतः ॥
भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः ।
आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते ॥"
इति मिताक्षरा ॥

**व्यवहारमातृका**, ( व्यवहारस्य मातृकेव । ) व्यवहारोपयोगिक्रिया । तद्यथा । व्यवहारदर्शनम् १ व्यवहारलक्षणम् २ सभासदः ३ प्राड्विवाकादिः ४ व्यवहारविषयः ५ राज्ञः कार्य्यानुत्पादकत्वम् ६ कार्य्यार्थिनि प्रश्नः ७ आह्वानानाह्वाने ८ आसेधः ९ प्रत्यर्थिन्यागते लेख्यादिकर्त्तव्यता १० पक्षविधौ हीनः ११ कीदृशं लेख्यं १२ पक्षाभासाः १३ अनादेयाः १४ आदेयः १५ नियुक्तजयपराजये वादिजयपराजयौ १६ शोधितलेख्यनिवेशनम् १७ उत्तरावधिशोधनम् १८ शोधिते पक्षारूढ़े उत्तरकर्त्तव्यम् १९ उत्तरलक्षणम् २० सत्योत्तरलक्षणम् २१ मिथ्योत्तरलक्षणम् २२ प्रत्यवस्कन्दनोत्तरम् २३ प्राङ्न्यायोत्तरम् २४ उत्तराभासः २५ सङ्कराद्युत्तरम् २६ प्रत्यर्थिक्रियानिर्द्देशः २७ उत्तरे पत्रेऽभिनिवेशिते साधननिर्द्देशः २८ वस्तुसिद्धौ सिद्धिः २९ चतुष्पाद्व्यवहारः ३० । इति मिताक्षरायां व्यवहारमातृका ॥

**व्यवहारमार्गः**, ( व्यवहारस्य मार्गः । ) व्यवहारविषयः । व्यवहारपदम् । इति मिताक्षरा ॥

**व्यवहारविधिः**, पुं, ( व्यवहारस्य विधिः । ) व्यवहारस्य विधानम् । धर्म्मशास्त्रम् । इति मिताक्षरा ॥

**व्यवहारविषयः**, पुं, ( व्यवहारस्य विषयः ।) व्यवहारपदम् । तत्तु अष्टादशविधम् । यथा । ऋणादानम् १ निक्षेपः २ अस्वामिविक्रयः ३ सम्भूयसमुत्थानम् ४ दत्तस्यानपकर्म्म ५ वेतनादानम् ६ संविदो व्यतिक्रमः ७ क्रयविक्रयानुशयः ८ स्वामिपालयोर्विवादः ९ सीमाविवादधर्म्मः १० वाक्पारुष्यम् ११ दण्डपारुष्यम् १२ स्तेयम् १३ साहसम् १४ स्त्रीसंग्रहणम् १५ स्त्रीपुंधर्म्मः १६ विभागः १७ द्यूतम् १८ । इति मानवे ८ अध्यायः ॥

**व्यवहारस्थानं**, क्ली, ( व्यवहारस्य स्थानम् । ) व्यवहारपदम् । व्यवहारविषयः । इति मिताक्षरा ॥